National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2018; 1(18): 04-06
© 2018 NJHSR
www.sanskritarticle.com

**सूर्य पवन् कुमार् हेच्**
शोधच्छात्रः,
राष्ट्रीयसंस्कृतविद्यापीठम्,
तिरुपतिः

**Correspondence:**
**सूर्य पवन् कुमार् हेच्**
शोधच्छात्रः,
राष्ट्रीयसंस्कृतविद्यापीठम्,
तिरुपतिः

# ध्वनिविरोधि प्रस्थानेषु अभिधावृत्तिमातृकायाः वैशिष्ट्यम्

**सूर्य पवन् कुमार् हेच्**

विदितचरमेव विपश्चितां लक्ष्यलक्षणात्मके साहित्यशास्त्रे ध्वनिप्रस्थानस्य विशिष्टं स्थानं विद्यते। ध्वनिसिद्धान्तस्य प्रवर्तको भवति आनन्दवर्धनाचार्यः। काव्यशास्त्रदृष्टान्तेषु ध्वनिसिद्धान्तः एवश्रेष्ठःभवति। सर्वजनाङ्गीकारयोग्यश्च भवति। अयं तावत् पर्यन्तं प्रचारे स्थितः भामहदण्ड्याचार्याणाम् अलङ्कारवादः, वामनस्यरीतिवादपर्यन्तं काव्यसिद्धान्तान् सर्वानपि एकच्छत्रस्य अधोभागे आनीतवानिति कथने अतिशयोक्तिर्न विद्यते। काव्यशास्त्रस्य विधिपूर्वकं चर्चामार्गः प्रप्रथमतयाऽनेन प्रशस्तीकृतः इति रसङ्गाधरकारस्य जगन्नाथस्य अभिमतम्।

**"ध्वनिकृताम् आलङ्कारिकसरणिव्यवस्थापकत्वादिति"।**[1]

ध्वनिसिद्धान्तस्य मूलं भवति भर्तृहरेः स्फोटवादः। स्फोटवादस्याधारेण आनन्दवर्धनः ध्वनिसिद्धान्तं प्रतिपादितवान्। स्फोटवादे अनित्यशब्दैः नित्यशब्दाः स्पुट्यन्ते। तत्र अनित्यशब्दाः व्यञ्जकाः नित्यशब्दाः व्यङ्ग्याः मध्ये व्यञ्जनाव्यापारः। एवं प्रक्रिया सर्वापि पुनः स्फोटशब्देन व्यपदिश्यते इति प्रतिपादितमेव। अमुमेव स्फोटवादं पुरस्कृत्य स प्रतिक्षिप्य काव्यशास्त्रे आनीतवान्। स्फोटसिद्धान्तोपजीव्यः ध्वनिसिद्धान्तव्यपदेश्यः इति सूचयितुमेव ग्रन्थस्यास्य ध्वन्यालोकः इति नाम अकार्षीत् ध्वनिकारः। अत्र ध्वनिशब्दस्य व्यङ्ग्यः, व्यञ्जकः, व्यञ्जनाव्यापारः, व्यङ्ग्यमयं काव्यम् एते चत्वारोऽपि अर्थाः भवन्ति। व्युत्पत्तिबलेन ते ते अर्थाः प्रसिद्धाः।
परं ध्वनिसिद्धान्तस्य उत्पत्तिकालादपि अनेके विप्रतिपत्तयः आसन्। अयं विषयः आनन्दवर्धनेनैव उदलेखि।

**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व**
**स्तस्याभावं जगदुरपरे भात्तमाहुस्तमन्ये।**
**केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**
**तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्॥**[2]

प्रथमोद्द्योते एव तेन प्रधानतया त्रयः पक्षाः दर्शिताः। तस्याभावं जगदुरपरे, भात्तमाहुस्तमन्ये, केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयमिति प्रथमकारिकायामेव निरदेशि। तत्र प्रथमाभाववादस्य त्रयः विकल्पाः सन्ति। पुनश्च भाक्तवादः, अनिर्वचनीयतावादः इति ध्वनेः पञ्चविप्रतिपत्तयः तेन प्रतिपादितः।
वाच्यार्थः सरसकवितावनितामतल्लिकायाः विलासाय उपरि आच्छादितः अवगुण्ठनरूप एव इति नवीनैः प्रत्यपादि।

प्राचीनाः आलङ्कारिकाः आचार्याः सर्वे तस्यैव प्रामुख्यं प्रदाय **"शब्दार्थौ काव्यजीवितमिति"**[3], वाच्यार्थः काव्यस्य सौन्दर्यसिन्धुरिति गुणदोषालङ्काररीतयः शब्दार्थसौन्दर्यसागरतरङ्गाः इति शुष्कतर्कपरम्परया परिश्रम्य भ्रमिम् उत्पादयामासुः।

नवीनमतानुसारिणः सहृदयशिरोमणयः प्रतीयमानार्थामृतरसास्वादानपरवशाः एव नाभूवन्। तावता चिरन्तानानामलङ्कारिकाः ध्वनितत्वं न अजानन् इति तेषां न्यूनता नैव आपद्येत। ते च नवीनानां मार्गदर्शका अभूवन्। तेषां मते प्रधानः वाच्यार्थः व्यङ्ग्यार्थस्य व्यञ्जको विभाति। एतं **"व्यङ्ग्यार्थं वस्त्वलङ्काररसध्वनितया"**[4] विभज्य ध्वनिमतप्रतिपादकं काव्यतत्त्वं बोधयित्वा अस्माकं महोपकारम् अकार्षुः। एतस्मिन् ध्वनित्रये उत्तमोत्तमः रसध्वनिरिति परिगणनया काव्यसौन्दर्यस्य नूतनाशोभा समागता। सूत्रप्रायेण अयं विषय एव ध्वनिमतसारतया प्रकाश्यते।

ततः प्रतीयमानार्थप्रकाशनमेव मतेऽस्मिन् विशेषतः उल्लेखनीयम्। प्राचीनमतानि सम्यक् विविच्य आलङ्कारिकैः निर्मितमिदम् नूतनं ध्वनिमतम्। व्याकरणशास्त्रस्य पाणिनि-वररुचि-पतञ्जलयः मुनित्रयनाम्ना प्रसिद्धाः। तत् शास्त्रं यथा प्रवर्तयामासुः तथैव आनन्दवर्धनाभिनवगुप्तमम्मटाचार्यत्रयमपि अलङ्कारशास्त्रं विकासयामासुः।

आचार्यत्रयमेतत् आधुनिकानाम् आलङ्कारिकाणां परमगुरुपदं लेभे। अत एव आनन्दवर्धनस्य आक्षेपध्वनिलक्ष्यम् अलङ्कारसर्वस्वकारस्य लक्ष्यमपि परिशीलयन् पण्डितराजः ध्वनिकारम् **"आलङ्कारिकसरणिव्यवस्थापकत्वेन"**[5] प्रमाण्य राजानकरुय्यकवचनानि विमृश्य निरस्तीकृतवान्। ततश्च नवीनालङ्कारिकाः आनन्दवर्धनाचार्यमार्गम् अनुसस्रुः।

तावता ध्वनिमतमिदं सर्वजनसम्मतमिति नैव मन्तव्यम्। इदं केचन बहिरङ्गतया खण्डयित्वा ध्वनिध्वंसकग्रन्थान् रचयामासुः। इतरे च ध्वनिम् अङ्गीकुर्वाणा अपि अन्यथा समन्वयं कर्तुं समारेभिरे। तेषु उद्भटालङ्कारस्य व्याख्याता प्रतीहारेन्दुराजः अन्यतमः।

प्रतीहारेन्दुराजस्य गुरुः मुकुलभट्टोऽपि लक्षणामार्गावगाहि तत्त्वमपि सहृदयाः ध्वनिरिति नूतनम् उपवर्णयामासुः इति विदुषां कुशाग्रबुद्ध्या निरूपणीयमिति प्रतिपाद्य सद्यः लक्ष्यः न बोधगम्यो भवति, अत एव अतिप्रसक्तः इति असम्मतिं प्रकाशयामास। इतोऽपि इतरे नूतनमतानि प्रवर्तयन्तः व्यञ्जनावृत्तिः नाङ्गीकार्या इति व्यञ्जनाव्यापारः न आवश्यकः इति प्रतीयमानार्थनाम्ना प्रकाशितः वाच्यार्थमात्रगम्यः इति नो चेत् तार्किकानुमानमूलतया बोधनीयः इति सप्रमाणं ध्वनिनाशकग्रन्थान् निर्ममिरे। एते च पूर्वं ध्वनिकारेण दर्शितान् विपक्षान् अभाववादिवादान् अतिरिच्य भाक्तवादमतम् अनुसृत्य ध्वनिमङ्गीकृत्यापि तं पृथक्तया निरूपयितुं प्रयत्नमकुर्वन्। तेषु राजानककुन्तलः अग्रगण्यः। ततोऽपि मुकुलभट्टः तन्मार्गम् अनुससार। ध्वनिप्रपञ्चम् अनुमानान्तर्गतम् उद्घोष्य महिमभट्टः ध्वनिविरोधिप्रस्थानानां प्रवर्तकत्वेन उल्लेखनीयः। श्रृङ्गारप्रकाशकर्ता भोजदेवः ततः धनिकधनञ्जयौ अपि परिगणनीयौ।

एवं ध्वनिविरोधिनां ग्रन्थेषु विप्रतिपत्तयो दृश्यन्ते। तेषां वर्गीकरणम् एवं दर्शनीयम्। अलङ्कारसर्वस्वस्य व्याख्याता जयरथः तद्व्याख्याने अनिर्दिष्टस्य कस्यचन ग्रन्थकारस्य द्वे कारिके निर्दिष्टवान्। यथा –

**तात्पर्यशक्तिरभिधा लक्षणानुमिती द्विधा**
**अर्थापत्तिः क्वचित्तन्त्रं समासोक्त्याद्यलङ्कृतिः।**
**रसस्य कार्यता भोगो व्यापारान्तरबाधनम्**
**द्वादशोत्थं ध्वनेरस्य स्थिता विपत्तिपत्तयः ॥**[6] इति।

एतासां विप्रतिपत्तीनां कल्पनम् अलङ्कारसर्वस्वटीकाकृतः समुद्रबन्धस्य वचनानुसारं सङ्गतम्।

अनया कारिकया ध्वनेः द्वादशविपक्षाः सन्तीति अवगम्यते। ते यथा –

**1) तात्पर्यशक्तिः – धनिकधनञ्जयभोजादीनाम्।**
**2) अभिधा – कुन्तकमुकुलभट्टयोः**
**3,4) लक्षणे – जहस्त्वार्थवादिनां, अजहत्स्वार्थवादिनाम्**
**5,6) अनुमितीः – श्रीशङ्कुकस्य, महिमभट्टस्य**
**7) अर्थापत्तिः – मीमांसकानाम्**
**8) तन्त्रं – श्लेषवादिनां, भट्टोद्भटादीनाम्**
**9) समासोक्त्याद्यलंकृतिः – अलङ्कारवादिनाम्**
**10) रसस्य कार्यता – भट्टलोल्लटस्य**
**11) भोगः – भट्टनायकस्य**
**12) व्यापारान्तरबाधनम् - सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधा व्यापारः इति वादिनाम्।**

ध्वनिविरोधिप्रस्थानेषु महिमभट्टस्य अनुमानवादानन्तरं मुकुलभट्टस्य अभिधावादः नितान्तं प्रबलो भवति। तथा हि –

**अभिधावृत्तिमातृकायाः वैशिष्ट्यम् –**

शक्तिः लक्षणा व्यञ्जनेति वृत्तिः त्रिधा। शक्तिरेव अभिधापदेन व्यवहारगम्या प्रसिद्धा एव। अभिधत्ते अनयोः शब्दार्थसम्बन्धः इत्यभिधा। अभिधानम् अभिधा। अभि इत्युपसर्गपूर्वकात् डुधाञ् धारणपोषणयोः इति धातोः **"आतश्चोपसर्गे"**[7] इति सूत्राणि कर्मणि भावे वा कप्रत्यये, स्त्रीत्वविवक्षायाम् **"अजाद्यतः टाप्"**[8] इति सूत्रेण आकारे स्त्रीप्रत्यये **"हलङ्याभ्यो दीर्घा सुतिस्यपृक्तं हल्"**[9] इति सुलोपे अभिधा इति रूपम्।

वर्तनं वृत्तिः **"वृतु वर्तने"**[10] इति धातोः भावे **"स्त्रियां क्तिन्"** इति क्तिन् प्रत्यये वृत्तिः इति रूपं भवति। वर्तयति शब्दार्थयोः सम्बद्धः इति वृत्तिः। शब्दार्थसम्बन्धनिरूपको व्यापारः वृत्तिरिति शब्दविषये वृत्तिशब्दार्थः प्रयोज्यः। एवं रूपेण अभिधावृत्तेः मातृकायस्याः सा अभिधावृत्ति मातृका।

मुकुलभट्टः एकमेव शब्दवृत्तिमङ्गीकरोति। सा च अभिधा। स मुख्यामुख्यत्वेनाभिधाया भेदद्वयं प्रतिपादियति। शब्दव्यापारतो यस्य प्रतीतिः सः मुख्यः। अमुख्यस्तु अभिधेयार्थसहायेन परिस्फुरति। अस्यैव लक्षणेति नामान्तरम्।

**शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।**
**अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते॥**[11]

अतस्तन्मते मुख्यो व्यापारोऽस्ति अभिधाव्यापारः। अभिधेयार्थप्रतीतिः साक्षात् शब्दव्यापाराज्जायते एवं तद्भिन्नस्य अर्थस्य प्रतीतिरभिधेयार्थसहकारितया समुपजायते। इदमेवास्ति मुख्यं पार्थक्यमुभयोः, एको मुख्यः अपर अमुख्यः। तत्र मुख्यामुख्यत्वेऽस्ति कारणमुपपादितं मुकुलभट्टेन स हि यथा – सर्वेभ्यः हस्तादिभ्योऽवयवेयभ्यः पूर्वं मुखमवलोक्यते, तद्वदेव सर्वेभ्यः प्रतीयमानेभ्योऽर्थान्तरेभ्यः पूर्मवगम्यते। तस्मान्मुखमिव मुख्य इति **"शाखादिभ्यो यः"**[12] इति पाणिनि सूत्रेण सदृशार्थे यप्रत्यये मुख्यपदं मुखसदृशमित्यर्थे प्रयुज्यते। यथा – **"गौरानुबन्ध्य इति। अत्र हि गोशब्दव्यपारद् यागसाधनभूता गोत्वलक्षणजातिरवगम्यते। अतस्तस्यामुख्यता तदेवं शब्दव्यापारगम्यो मुख्योऽर्थः"**।[13]

यस्य तु शब्दव्यापारगम्यार्थपर्यालोचनया विगतस्य लाक्षिणकत्वम् अमुख्यत्वं वा शब्दान्तरम्। यथा गौरनुबन्ध्य इत्यत्र गोव्यक्तिप्रतीतेः सा हि न शब्दव्यापारादवसीयते।

**"विशेष्यं नाभिधागच्छत् क्षीणशक्तिर्विशेषणे"**[14] इति न्यायात् शब्दस्य शब्दप्रत्यायितजातिसामर्थ्यादत्र जातेराश्रयभूता व्यक्तिराक्षिप्यते।

तेनासौ लाक्षिणिकी, एवमयं मुख्यलाक्षिणिकात्मविषयोपवर्णन द्वारेण शब्दस्याभिधाव्यापारो द्विविधः प्रतिपादितो निरन्तरार्थविषयः सान्तरार्थनिष्ठश्च।

सारांशस्त्वयमेव यत् साक्षाच्छब्दव्यापारतः प्रतीतिः स निरन्तरार्थविषयः अभिधाव्यापारः मुख्यः, यत्र च अभिधेयार्थसहकारितया अन्यार्थस्य प्रतीतिः स सान्तरार्थनिष्ठः अभिधाव्यापारः अमुख्यः तस्यैव च लाक्षणिकत्त्वम्।

मुकुलभट्टः अभिधायाः दशभेदान् स्वीकरोति। अर्थस्यावन्तरभेदानाश्रित्य मुख्यार्थः चतुष्प्रकारको भवति। जातिगुणक्रियासंज्ञानां भेदात्। अत एव अभिधायाः लक्षणाव्यतिरिक्तो भेदः चतुष्प्रकारको भवति – जातिज्ञापकः, गुणज्ञापकः, क्रियाज्ञापकः, संज्ञाज्ञापकश्च। यथा **"गौः शुक्लश्चलो डित्थः"** इत्यस्मिन् वाक्ये गो शब्दः जातिज्ञापकः, शुक्लशब्दो गुणज्ञापकः, चलशब्दः क्रियाज्ञापकः, डित्थशब्दश्च संज्ञारूपको वर्तते।

यत्राभिधेयस्य सहकारितयाऽमुख्योर्थः प्रतीयते तत्र लक्षणानाम्नी शब्दस्य अमुख्या शक्तिर्भवति। नेयमर्थशक्तिः अवश्यं तत्रार्थस्य सहकारिता। अत एव सान्तरार्थनिष्ठोऽयं शब्दव्यापारा इति मुकुलभट्टस्य आशयः। अस्य द्वौ भेदौ शुद्धत्वादुपचारमिश्रित्वाच्च।

**अभिधाव्यापारः**

मुख्यः –
1.जातिः – गौः
2.गुणः – शुक्लः
3.क्रिया – चलः
4.यदृच्छा – डित्थः

**लक्षणा**

1.शुद्धोपदाना – गौरानुबन्ध्यः।
2.शुद्धलक्षणलक्षणा – गङ्गायां घोषः।
3.शुद्धसारोपा – आयुर्घृतम्
4.शुद्धसाध्यवसाना –पाञ्चालाः
5.गौणसारोपा – गौर्वाहीकः
6.गौणसाध्यवसाना – राजा

एवं रूपेण मुकुलभट्टेन अभिधावृत्तं दशधा विवेचितम्।

**मुकुलभट्टमतस्य सारांशः**

1.मुकुलभट्टानुसारेण सर्वेषामर्थानां सिद्धिः अभिधयैव भवति।

2.अभिधया येषामर्थानां ज्ञानं भवति तेषु प्रथमोऽर्थः, मुख्यऽभिधीयते, अन्ये च सर्वे अर्था लाक्षणिकाः भवति।

3.अभिधैको व्यापारविशेषो वर्तते यः शब्दान्निस्सरति, प्रथमं मुख्यार्थः स्वयमेव बोध्यते, किन्तु मुख्यार्थव्यतिरिक्तिनामर्थानां बोधनाय मुख्यार्थस्य साहय्यमपेक्षते।

4.अभिधानामकस्य शब्दव्यापारस्यार्थः दशप्रकारकः सन्ति। स व्यापारोऽपि दशप्रकारको भवति।

5.मुकुलभट्टानुसारेण शब्दस्याभिधानामकस्य व्यापारस्यापि विरामो भवति। सः तम् अन्तिमार्थोपस्थितिं यावत् निरन्तरं सक्रियं स्वीकरोति।

एतावता विचारेण अभिधावृत्तिमातृकाकारः भाक्तमतावलम्बी इति परिलक्ष्यते। इति शिवम्।

**उपयुक्तग्रन्थसूची –**

1.रसगङ्गाधरः – चौखाम्बा विद्याभवन्, वारणासी – 2013
2.पाणिनीय व्याकरणमहाभाष्यम् – चौखाम्बा प्रतिष्ठान्, दिल्ली – 2004
3.अष्टाध्यायीसूत्र सङ्ख्या – चौखाम्बा संस्कृत संस्थान् – 2002
4.ध्वनिविरोधिन आचार्याः तेषां सिद्धान्तश्च – भारतीय विद्याप्रकाशन्, दिल्ली -1996
5.अभिधावृत्तिमातृका – कृष्णदास अकादमी, वारणासी – 2008
6.अभिधावृत्तिमातृका – चौखाम्बा विद्याभवन्, वारणासी – 1995
7.अलङ्कारसर्वस्वम् – जयरथविमर्शनी समुपेतम्, चौखाम्बा संस्कृत संस्थान् – 2000
8.काव्यालङ्कारः – चौखाम्बा संस्कृत संस्थान्, वारणासी – 2002
9.ध्वन्यालोकः – चौखाम्बा विद्याभवन्, वारणासी – 2014
10.बृहद्धातुकुसुमाकरः – चौखाम्बा संस्कृत प्रतिष्ठान्, दिल्ली – 2007

**सन्दर्भ ग्रन्थसूची :-**

1. रस.2.आ
2. ध्वन्या.1.1
3. काव्यालङ्कारः.1.6
4. ध्वन्या.पृ.59
5. र.ग.आ.2
6. अ.स.वि.व्याख्य.पृ.25
7. अ.सू.स.3.1.136
8. अ.सू.स.4.1.4
9. अ.सू.स.6.1.68
10. बृ.कु.758
11. अ.मा.पृ.2
12. अ.सू.स.5.3.103
13. आ.मा.पृ.2
14. अ.मा.पृ.2